# हरिवंशं – भविष्यपर्वं
## नीलकण्ठव्याख्यानसमेतं
## अथ त्रयोविम्शोऽध्यायः
## प्राणायामवर्णनम्

वैशम्पायन उवाच

**पितामहं पुरस्कृत्य मेरुपृष्ठे समाहिताः ।**
**जटाजिनधरा विप्रास्त्यक्तक्रोधा जितेन्द्रियाः ॥ ३-२३-१**

द्युचर्या व्रतचर्योत्थेत्यूचे सप्तदशे व्रतम् ।
प्राणयज्ञं हविर्यज्ञसंज्ञं चित्तजयावहम् ॥ १ ॥

पूर्वाध्यायान्ते सर्वे त्वेते दिविचरा भवन्ति व्रतचारिणा इत्युक्तं तत्र मनोजयाख्यं व्रतम् । एकादशे प्रोक्तमेवोत्तमाधिकारिणाम् ।मध्यमाधमानां तु चित्तजयायात्मविविदिषोत्पादनाय च तृतीयाध्यये सुचितं व्रतद्वयं प्राणरोधाख्यं हविर्यज्ञाख्यं च तदिह द्वयमभिधीयते तयोराद्यमपि यज्ञरूपकेणैव विवक्षन् वैशम्पायन उवाच - पितामहं पुरस्कृत्येत्यादि । श्लोकत्रयोक्तविशेषणाः व्रतहिते रताः दिवि ब्रह्मणि चराः संचारिणो भवन्तीति पूर्वेणान्वयः । अत्र योगचिन्तामणौ सांख्ययोगे

*चक्रमध्ये स्थिता नाड्यास्तिस्त्रस्तिस्त्रोऽत्र देवताः ।*
*इडा च वैष्णवी नाडी पिङ्गला ब्रह्मदेवता ॥ १ ॥*
*ऐश्वरी सा सुषुम्ना स्यान्मेरुमध्ये व्यवस्थिता ।*
*नाडी मध्यगता ग्रन्थित्रययुक्ता त्रिवेणिका ॥ २ ॥*
*उत्तरे वहते गङ्गा यमुना दक्षिणे स्मृता ।*
*सरस्वती पश्चिमायामासां सङ्गः सदान्तरः ॥ ३ ॥*

इत्युक्तेर्मेरुर्नासिका तस्या पृष्टं भ्रूघ्राणमध्यं तस्मिन् समाहिताः समाधिं गताः किं कृत्वा पितामहं कार्यस्य पिता कारणं तस्य पित शुद्धं ब्रह्म तत् पुरस्कृत्य तत्प्राप्तिमादृत्य ।

**पर्वतान्तरसंसिद्धे बहुपादपसंवृते ।**
**धातुसंरञ्जितशिले समे निस्तृणकण्टके ॥ ३-२३-२**

पर्वतेति । पर्वतान्तरसंसिद्धे पर्वतानां पर्ववतामस्थ्नां नासावंशकपालास्थ्नोरन्तरे संसिद्धं नित्यसिद्धं तन्नाशेऽप्यविनाशि - *हार्दाकाशं प्रकृत्यववधेनास्य हन्यते* - इति श्रुतेर्देहनाशेऽपि आत्मोपलब्धिचक्राणामनाशावगमात् । बहुपादपसंकुले बहुपादो नानायोगिगमनसाधन धर्माधर्मवान् अहंकारः तं पातीति तदुपाधिः प्राणो वायुस्तेन संकुले । धातुसंरञ्जितशिले धातवो वातपित्तकफाः मनः शिलादिधातुसरूपा नाडिमार्गा वा तैः संकुला शिला इव शिला अस्थिरूपा यस्मिन् । समे समस्य ब्रह्मण उपलब्धिस्थाने तृणं बहिष्ठत्वाज्जरारोगादिदुःखं कण्टकः अन्तस्तत्वाच्छोकादि दुःखं देहद्वयधर्मरहितमित्यर्थः ।

**त्रयाणां ब्रह्मवेदानां पञ्चस्वरविराजिते ।**
**मन्त्रयज्ञपरा नित्यं नित्यं व्रतहिते रताः ॥ ३-२३-३**

त्रयाणामिति । त्रयो ये ब्रह्म वेदयन्ति तेषां त्रयाणां ब्रह्मवेदानां इडापिङ्गलसुषुम्नारूपाणां जीवोपाधिभूतप्राणमार्गाणां संबन्धिनः पञ्च स्वराः स्वर्यते गम्यते ब्रह्म यैस्ते स्वराः प्राणस्य वृत्तिभेदाः प्राणापानसमानव्यानोदानास्तैर्विराजिते । पञ्चानामपि वायूनामेकीभावस्थान इत्यर्थः । मन्त्रयज्ञपरा नित्यं मन्त्राः प्राणादीनां तु रेफादिप्रभृतीनि बीजानि तेषां यज्ञो जपः तत्पराः नित्यं व्रते वायुजये हिते आनन्दरूपे आत्मनि च रताः । अत्र पञ्चानामपि प्राणादीनां स्थानवर्णबीजान्तानि नकुलीशयोगपरायणे प्रोक्तानि वर्तन्त इति उक्तानि विशेषणानि मेरुपृष्ठे युज्यन्ते । तानि च

*प्राणो घ्राणग्रहृन्नाभिपादाङ्गुष्ठान्तसंस्थितः ।*
*नीलः सोङ्काररेफादिबीजेन विनियोजितः ॥ १ ॥*
*कृष्णोऽपानः कृकाटिस्थः पृष्ठपृष्ठान्तपार्ष्णिगः ।*
*सतारकवकारान्तबीजेन विनियोजितः ॥ २ ॥*
*शक्रचापनिभोव्यानत्वगिन्द्रियनिकेतनः ।*
*तारकोपेतपान्तश्च बीजतेजोविराजितः ॥ ३ ॥*

*मूर्धस्थो मध्यताल्वग्रकण्ठहृदयनलाश्रयः ।*
*उदानो ह्यरुणच्छायस्तारकाक्रान्तयान्तयुक् ॥ ४ ॥*
*श्वेतः समानो हृन्नाभिसर्वसंधिनिकेतनः ।*
*प्रणवाक्रान्तलान्तेन बीजेनात्यन्तमुज्ज्वलः ॥ ५ ॥*

इति । तत्रायं निकृष्टोऽर्थः - मेरुपृष्टाख्यभ्रूघ्राणमध्योपलक्षिते ब्रह्मणि सर्वकारेण नित्यसिद्धजीवोपाधिनाऽनेकवर्ण बीजवता नानावर्णनाडीत्रयसंचरिणा युते बाह्याभ्यन्तर दुःखशून्ये क्रोधादिजयिनो निर्ममाः प्राणजयद्वारा चित्तवृत्तिमेकाग्रां कुर्वन्ति निरोधाभ्यासेन निर्विशेषं ब्रह्म प्रतिपत्तुमिति ॥

**एकमेवाग्निमाधाय सर्वे ब्राह्मणपुङ्गवाः ।**
**बिभिदुर्मन्त्रविषयैः सुसमाहितमानसाः ॥ ३-२३-४**

एकमेव प्राणाग्निं आदाय आलम्ब्य मन्त्रविषयैः मन्त्राः उदाहृदा रेफादिमुख्याः तेषां प्रतिपाद्या विषया प्राणानाद्याः प्रवृत्तिविशेषाः तैरुपाधिभिर्बिभिदुः पञ्चता प्राणापानादि प्रकारेण विभिन्नं चक्रुः । यथोक्तं तत्रैव -

*कौष्टयो वायुः प्राणनादिकर्मभेदादयथाक्रमम् ।*
*प्राणोऽपानसमानादिनामान्तरमुपागतः ॥ इति ।*

**त्रिधा प्रणीतो ज्वलनो मुनिभिर्वेदपारगैः ।**
**अतस्ते तत्त्वमापन्ना यदेकस्त्रिविधः कृतः ॥ ३-२३-५**

त्रिधेति । ज्वलनः प्राणाग्निः त्रिधा पूरककुम्भकरेचकरूपे प्रणीतो नाडिमार्गैः संचारितः अतः प्रणयनात्ते तत्त्वं प्राप्ताः पूरकाद्यभ्यासेनैव आत्मतत्त्वं अधिगम्यत इति भावः ।

**एक एव महानग्निर्हविषा संप्रवर्तते ।**
**स्वधाकारेण मन्त्रज्ञ मन्त्राणां कार्यसिद्धये ॥ ३-२३-६**

एक एवेति । एक एव प्राणाग्निः प्राणायामाभ्यासिनः हविषा ।

*आदेयानि च वक्ष्यामि क्षिप्रं योगस्य सिद्धये ।*
*क्षीरं घृतं च मिष्टान्नं मिताहारस्य शस्यते ॥*इति

दत्तात्रेयोदितेन सम्यङ् निषेवितेन महान् भूत्वा सम्यक् योगिनो विक्षेपकुर्वन् प्रवर्तते आरोहावरोहमार्गयोर्यथेष्टं संचरति । अयमर्थः - नासिकान्तो बहिरन्तश्च द्वादशद्वादशांगुलमानेन प्राणः संचरन् तूलपिण्डवत् घनीभूतः कुम्भकाभ्यासेन तूलपिण्डमिव शिथिलावयवसंयोगं कुर्यात् । ततश्च बहिरन्तश्च षट् त्रिंशत् षट् त्रिंशदम्गुलमानेन परमा प्राणस्य गतिर्भवति । स तदा सूक्ष्मो अपि पुरोडाशवन्मथितोमहानित्युच्यते । एवं भूतस्य प्राणाग्नेः ।

*पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद् दृढम् ।*
*अपानमूर्ध्वमाकृष्य मूलबन्धोऽयमुच्यते ॥*

इत्यादिना हठोक्तप्रकारेण वायोरारोहः प्रसिद्धः, भ्रुवोर्मध्ये प्राणमावेश्येति शास्त्रप्रसिद्ध एव । अवरोहो अपि योगिना याज्ञवल्क्येनोक्तः

*सम्पूर्य कुम्भवद्वायुमम्गुष्ठान्मूर्ध्निमध्यतः ।*
*धारयत्यनिलं बुद्ध्या प्राणायामः प्रचोदितः ॥ १ ॥*
*व्योमरन्ध्रात् समाकृष्य ललाटे धारयेत्पुनः ।*
*ललाटाद्वायुमाकृष्य भ्रुवोर्मध्ये निरोधयेत् ॥ २ ॥*
*नेत्रात्प्राणं समाकृष्य नासामूले निरोधयेत् ।*
*नासामूलात्तु जिह्वाया मूले प्राणं निरोधयेत् ॥ ३ ॥*
*कण्ठकूपात्तु हृन्मध्ये हृन्मध्यान्नाभिमध्यमे ।*
*नाभिमध्यात् पुनर्मेढ्रे मेढ्रात्वह्न्यालये ततः ।*
*देहमध्याद् गुदे गार्गि गुदाद्वै ऊरुमूलके ॥ ४ ॥*
*ऊरुमूलात्तयोर्मध्ये तस्माज्जान्वोर्निरोधयेत् ।*
*बस्तिमूले ततस्तस्माज्जङ्घयोर्मध्यमे तथा ॥ ५ ॥*

*जङ्घां ततः समाकृष्य वायुं गुल्फे निरोधयेत् ।*
*स्थनात्स्थाने समाकृष्य यस्त्वेवं धारयोद्धिया ॥ ६ ॥*
*सर्वपापविशुद्धात्मा जीवेदाचन्द्रतारकम् ।*
*एतत्तु योगसिद्ध्यर्थमगस्त्येनापि कीर्तितम् ॥ ७ ॥*इति ।

स्वधेति । स्वस्मिन् शरीरे धानं विधानं देहे वायोर्धारणेति यावत् तस्याः कारणेन हे मन्त्रज्ञ राजन् मन्त्राणां पूर्वोक्तानां रेफादिप्रभृतीनां प्रकाशत्वेन संबन्धि कार्यं तत्तद्भूतजयः तत्सिद्धयेऽग्निः संप्रवर्तत इत्यर्थः । तत्र धारणासिद्धयश्चोक्ता योगिना याज्ञवल्क्येन

*यमादि गुणयुक्तस्य मनसः स्थितिरात्मनि ।*
*धारणेत्युच्यते सद्भिः शास्त्रतात्पर्यवेदिभिः ॥ १ ॥*
*व्योमांशे मारुतांशे च धारणां कुर्वतः शुभाम् ।*
*त्रिदोषजनिता रोगा विनश्यन्ति न संशयः ॥ २ ॥*

इत्यन्तेन ग्रन्थेन दर्शिताः । तत्र पादादिजान्वन्तं जान्वादिपाय्वन्तं पाय्वादिहृदयान्तं ततो भ्रूमध्यान्तं ततो मूर्द्धान्तं च क्रमेण भूम्यम्बुतेजोवाय्वाकशस्थानानि ब्रह्माविष्णुरुद्रेश्वर सदाशिवाधिष्ठितानि ल-व-र-य-ह बीजयुतानि तेषु तेषु पञ्चपञ्चघटिकापर्यन्तं मनो धारयंस्तत्तद्भूतजयो भवति । तथा तेजोऽबन्नेषु धारणां कुर्वतः क्रमात् वातपित्तश्लेष्मजा रोगा नश्यन्तीति ज्ञेयम् । विस्तरभयात्तु न प्रपञ्चितम् ।

**स्वयं च दक्षसंप्राप्तो भगवान्भूतसत्कृतः ।**
**ब्रह्मा ब्राह्मणनिर्माता सर्वभूतपितामहः ॥ ३-२३-७**

एवं त्रिधा प्रणीत इत्यादिना पूरककुम्भकरेचकाभ्यासेन विपुलीकृतो हविष्याशनाभ्यासमहिम्ना वशीकृतो यत्रकुत्रचिद्धारितः प्राणाग्निस्तत्तद्धारणाफलं प्रसूते इत्युक्तम् तत्र प्रणवेन परमात्मन्येव धारितस्य प्राणस्य फलमुच्यते - स्वयमिति । दक्षते सर्वस्मिन्कार्ये संनह्यतीति दक्षः सूत्रात्मा तद्रूपेण संप्राप्तो भवति भगवान्सर्वैश्वर्यसंपन्नः भूतं नित्यसिद्धं च तत् सच्च कारणं तेन कृतः निर्मितः ।

*आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।*

*ध्याननिर्मन्थनाभ्यासात्पापं दहति पण्डितः ॥*

**इति स्मृते प्रणवेनात्मनि चेतो युञ्चतः प्रथमम् उकारार्थभूत-सुत्रात्मसाक्षात्कारो भवतीत्यर्थः । स एवंभूतो दक्षो मुख्यो ब्राह्मण इति ब्रह्मा ब्राह्मणस्य चतुर्मुखस्य निर्माता । अत एव सर्वेषां भुतानामस्मदादीनां पितामहः ॥**

**दण्डी चर्मी शरी खड्गी शिखी पद्मनिभाननः ।**
**अभवन्न्यस्तसंतापो जितक्रोधो जितेन्द्रियः ॥ ३-२३-८**

कोऽयं दक्ष इत्याशङ्क्य यः पूरकादिना आराधितः प्राणाग्निः स एवायमित्याह दण्डीति । योऽयं पूर्वं पूरककाले नासिकानलिकया पूर्यमाणत्वाद्दण्डाकारमिव प्राप्त इति दण्डी जातः । स एव कुम्भकावस्थायां चर्मवाद्वितत इति चर्मिव रूपेण संवृत्तः । स एव पुनः रेचकावस्थायां दण्डरूपात्सूक्ष्मरूपेण शरकाण्डाकारत्वं पूर्ववत्प्राप्तः स एव स एष खड्गवत्तीक्ष्णधारः सम्सारवृक्षच्छेदनसमर्थः शिखी प्राणाग्निः । पद्मनिभानन इत्यनेन दक्षरूपेण प्रसन्न इति लक्ष्यते । अभवत् प्रसन्नभावेन न्यस्तसंतापो जितक्रोधो जितेन्द्रियश्च स्वभावतोऽभवत् । तत्र स्वाभाविकं वैराग्याद्याविर्भूतं न हठाकृष्टमित्यर्थः । यथोक्तं वृद्धै

*उत्पन्नात्मप्रबोधस्य ह्यद्वेष्ट्रत्वादयो गुणाः ।*
*भवन्त्ययत्नतः सिद्धा न तु साधकरूपिणः* इति ।

**यजते पुष्करे ब्रह्मा मेधया सह संगतः ।**
**इन्द्रप्रोक्तानि सामानि गीयन्ते ब्रह्मवादिभिः ॥ ३-२३-९**

यजत इति । ब्रह्मा दक्षः पुष्करे आत्मतीर्थे मेधया शास्त्राचार्योपदेशप्राप्तया धीवृत्त्या सह संगतो यजते तन्निष्ठो भवति । यस्यामवस्थायाम् इन्द्र आत्मदर्शी तेन प्रोक्तानि सामानि - *अहमन्नमहमन्नम्* - इत्यादीनि तैत्तरीयप्रसिद्धानि इदमदर्शमिति - *तस्मादिन्द्रो नामेदम् इन्द्रो ह वै नाम तमिदम् सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः* - इत्यैतरेयके च इन्द्रशब्दस्य आत्मदर्शिनि प्रवृत्तिनिमित्तं दर्शितम् ॥

**घृतं क्षीरं यवा व्रीहिः सर्वं परमकं हविः ।**

**वेदप्रोक्तं मखे न्यस्तं कल्पितं ब्रह्मणः पदे ॥ ३-२३-१०**

स समाहितो योगी पूर्वसंस्कारात् समाधेरप्रच्युतये तत्र यज्ञमेव कल्पितवानित्याह - घृतमिति । मखे बाह्ययज्ञे न्यस्तं देवतोद्देशेन त्यक्तम् परमकम् अभौतिकत्वाच्छ्रेष्ठम् कल्पितं मनसैव न कर्मतः ब्रह्मणः सूत्रात्मनः पदे स्थाने समाध्यवस्थायामित्यर्थः ॥

**निर्मथ्यारणिमाग्नेयीं शमीगर्भसमुत्थितां ।**
**स ब्रह्मा प्रथमं तस्मिन्नग्निमन्यं प्रवर्तयत् ॥ ३-२३-११—**

निर्मथ्येति । अग्नेः परमेश्वरस्य तिरोधानस्थानभूतारणिरिवारणिरविद्या तां निर्मथ्य विनाश्य शमीगर्भसमुथितं शम् सुखं ईर्यते गम्यतेनेनेति शमी देहः शमी वृक्षतुल्यो वा तस्य गर्भे सम्यगुत्थितम् आविर्भूतं प्रथमं कारणं ब्रह्मरूपमन्यमकल्पितमग्निम् अन्तर्यामिणं प्रकर्षेण वर्तयत् ।अडभाव आर्षः ।शरिरे नित्याविर्भूतमपि देहाद्यामिमानवशातिरोहितैश्वर्यं सन्तं देहभिमानत्यागात् स्वेनेश्वरेण रूपेणाविर्भभूवेत्यर्थः । ब्रह्मा ब्रह्मवित् तस्मिन् सुत्रात्मनि ॥

**न ह्यल्पं विहितं द्रव्यं यथाग्निर्यज्ञकर्मणि ।**
**प्रवर्तयेद्विभागैर्वा हुतद्रव्यमयं बलम् ॥ ३-२३-१२**

ननु यथा सोमयागे आरण्यामग्निमन्थनं क्रियते यथा वा चातुर्मास्येषु तद्वदिहापि तावत्काल्पनिक एवायं निर्मथ्योऽग्निरस्तु किं सूत्रादन्यस्य कारणाग्नेः कल्पनेनेत्याशङ्क्याह - न ह्यल्पमिति ।यथा यज्ञकर्मणि बाह्ये अग्निर्निर्मथ्य होम्यत्वेन विहितः अमृताहुतिरह्ण्याहुतिः सैषा स्वर्ग्याहतिर्यदग्न्याहतिरिति प्रीतिपूर्वकं मानसे यज्ञे तथाऽत्र अग्न्याख्यम् अल्पं बाह्यं द्रव्यं विहितं न हि योगिना इत्थं यज्ञश्चिन्तनीय इति विधिरस्ति । किं तु यज्ञीयसंस्कारदार्ढ्याद्योगेऽपि तादृशाः संकल्पा भवन्ति । अत एव श्रुतिः - *स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति* - इति चिरपरिचितानां पित्रादिनामेव योगेन संप्रज्ञातावस्थायमुत्थानमाह । परिपक्वयोगिविषयं तु अदृष्टाश्रुतवस्तु दर्शनं समाधावति प्राकृतकर्मणो अत्रानधिकारादन्योऽग्निरत्र प्रकृतसूत्रादनन्तर ईश्वरएव ग्राह्यः ।यत् अल्पं द्रव्यम् उत आज्यपयः प्रभृति अग्नौ त्यागपूर्वकं प्रक्षिप्तं तद्विकारभूतं स्वर्गे दिव्यदेहादि तस्य बलम् अत्र विभागैर्यथोच्चनीचस्थानं प्रवर्तयेन्नत्विह तथेत्यर्थः

। अल्पद्रव्यसाध्येषु हि यज्ञेषु वित्तव्ययस्वरूपश्रद्धातारतम्येन फलतारतम्यमस्ति । आत्मयज्ञे तु नायं विभागः सर्वेषां कैवल्यरूपस्यफलस्यैकरूपत्वादिति भावः ॥

**फलानि तैः प्रयुक्तानि हविंषि विततेऽध्वरे ।**
**प्रयुञ्जते प्रयोगज्ञा मुनयो ब्रह्मवादिनः ॥ ३-२३-१३**

तर्हि किमर्थं संप्रज्ञातं हविरादिकल्पनमुक्तमत आह - फलानीति । विततेऽध्वरे योगयज्ञे हवींषि यानि विहितानि तैर्हविर्भिः फलानि च प्रयुक्तानि भवन्ति । *तं यथा यथोपासते तथा तथा प्रेत्य भवति* इति श्रुतेः यादृग्गुणविशिष्टमात्मानं चिन्तयति तादृक्फलभागी ब्रह्मलोके भवति । ये तु ब्रह्मवादिनः अत्रैव ब्रह्मसाक्षात्कारवन्तस्तेषां तानि फलानि अणिमादैश्वर्याणि अत्रैव निग्रहानुग्रहप्रयोगज्ञाः प्रयुञ्जते प्रकाशयन्ति । तथा च काम्यमेव हविरादिकल्पनं न तात्त्विकमिति भावः ।

**षण्मासांश्चतुरो वेदान्संबभाषे बृहस्पतिः ।**
**ब्रह्मणो वितते यज्ञे परया ब्रह्मसम्पदा ॥ ३-२३-१४**

योगफलमेव भङ्ग्यन्तरेणाह - षण्मासानिति । बृहस्पतिः देवाचार्यः परया ब्रह्मसम्पदा । *एषा आस्य परमा संपदः* इति श्रुतिः । निर्विशेषावस्थया ब्रह्मसम्बन्धिनि यज्ञे योगे वितते सति षण्मासान् - अत्यन्तसंयोगे द्वितीया । मासषट्कम् आदरनैरन्तर्यदीर्घकालैः सम्यगभ्यस्ते सति चतुरो वेदान् भभाषे चतुर्भिर्वेदैः सह संवादं कृतवान् । वेदान् लब्दवानित्यर्थः । षण्मासादेव योगसिद्धिर्भवतीति भावः तथ च मैत्रायणीयश्रुतिः

*षड्भिर्मासैस्तु युक्तस्य नित्ययुक्तस्य देहिनः ।*
*आनन्दः परमो गुह्यः सम्यग्योगः प्रवर्तते* ॥इति

**शिक्षाक्षरसमेताया मधुरायाः समन्ततः ।**
**सानुस्वरितरामायाः सरस्वत्याः प्रभाषते ॥ ३-२३-१५**

स लब्दवतो बृहस्पतिर्वेदसम्प्रदायं शिष्येषु प्रवर्तितवानित्याह - शिक्षेति । सः सरस्वत्याः । कर्मणि षष्ठी । सरस्वतीं प्रभाषते सर्वेभ्यो वेदमध्यापयतीत्यर्थः । सानु शिखरम्

वेदशिर उपनिषदिति यावत् । स्वरितं स्वर्गतिः तत्साधनं कर्म ताभ्यां रामाभिरामा तस्याः । ब्रह्मकर्मकाण्डाभ्यां रमणीयेत्यर्थः ।

**तेन ब्राह्मणशब्देन ब्रह्मप्रोक्तेन भारत ।**
**विभाति स मखो व्यक्तं ब्रह्मलोक इवापरः ॥ ३-२३-१६**

तेन वेदोपदेशेन ब्राह्मणानि कर्मचोदनवाक्यानि तैः शिक्षते इति ब्राह्मणः शब्दः तेन प्रवृत्तिप्रधानेनेत्यर्थः ।ब्रह्मप्रोक्तेन वेदोदितेन मार्गेण विरच्यमानः स मखः याज्ञिकप्रसिद्धो यज्ञः ब्रह्मलोक इव आध्यात्मिकयोगयज्ञ इव विभाति ।

**मखो ब्रह्ममुखोत्तीर्णो ब्रह्मशब्दैरनामयैः ।**
**प्रयोगैः संप्रयुक्तस्य जल्पन्निव विवर्धते ॥ ३-२३-१७**

मखमेव स्तौति । - पदं विष्णुरजो ब्रह्मेत्यतः प्रोक्तनेन संदर्भेण- मख इति । ब्रह्मशब्दैर्वेदशब्दैः अनामयैः अप्रमाण्यशङ्काशून्यैः प्रयोगैः यथाश्रुतं विनियुक्तः मन्त्रैः संप्रयुक्तस्य सादरस्य यजमानस्य मखो जल्पन्निव विवर्धते ॥

**समिद्भिः सोमकलशैः पात्रैश्चैव बर्हिः खलैः ।**
**यवैर्व्रीहिभिराज्यैश्च पूर्णैश्च जलभाजनैः ॥ ३-२३-१८**

सोमकलशैः सोमधारणार्थैः ग्रहचमसैः पात्रैः स्रुक्स्रुवादिभिः जलभाजनैः वसुनिचयैकधनैर्भाजनैः ।

**कर्मप्राप्तैश्च पशुभिः कर्मभिश्चापरान्वितैः ।**
**गोभिः पयस्विनीभिश्च परिवेशैश्च कोमलैः ॥ ३-२३-१९**

कर्मेति ।कर्म यज्ञार्थं वर्धत इत्यनुषज्यते ।प्राप्तैर्वसुभिः कनकादिभिः कर्मभिरिष्टयादिभिः परान्वितैः परस्मिन् ब्रह्मणि समर्पितैः वत्सैश्च परिप्राप्तैरिति संबन्धः - *छन्दसि परेऽपि*

*व्यवहिताश्च* इति धातूपसर्गयोः आर्षः संबन्धः ।कोमलैः बालैः

**ब्रह्मवृद्धो वयोवृद्धस्तपोवृद्धश्च भारत ।**
**ब्रह्मज्ञानमयो देवो विद्यया सह संगतः ॥ ३-२३-२०**

ब्रह्मणा वेदघोषेणः वृद्धः वयसा दक्षीणया वृद्धः ।*यज्ञ आयुष्मान्स दक्षिणाभिरायुष्मान्* - इति श्रुतेः पुष्कलदक्षिणावानित्यर्थः ।तपसा ज्ञानेन वृद्धः ब्रह्मज्ञानमयस्तत्प्रधानस्तदर्य इत्यर्थः ।विद्यया कर्माङ्गावबद्धोद्गीथाद्युपासनया ॥

**मानसैश्च क्रियामूर्तिर्ये च भूताः स्वयं नृप ।**
**ब्रह्मा जुहोति तांस्तस्मान्मरुद्भिः सहितस्तदा ॥ ३-२३-२१**

मानसैरिति ।मनः कल्पितैः ।समिदादिभिः ।क्रियामूर्तिर्यज्ञात्मा ब्रह्मा ये च पदार्था अन्ये तस्माद् ब्रह्मणः स्वयं भूता विनाऽपि कल्पनास्वभावादव वात्मन्यध्यस्तास्तान् घृतादीन् जुहोति ॥

**तेजोमूर्तिधरै रूपैर्न च तत्कर्मणास्पृशत् ।**
**वेदप्रोक्तेन विधिना सर्वप्राणभृतां वर ॥ ३-२३-२२**

तेजोमूर्तिधरैः चिन्मयैः रूपैः द्रव्यदेवतादिभिः योगरूपैरुपेतं तद्ब्रह्मणो यजनं सर्वप्राणभृतां कर्मणां न अस्पृशत् न स्पर्शं प्राप सर्वाधिकः स यज्ञ इत्यर्थः ।

**निर्मथ्यारणिमाग्नेयीं शमीगर्भसमुत्थिताम् ।**
**क्रतुना यजते पूर्णमग्निष्टोमेन स प्रभुः ॥ ३-२३-२३**

शम्याः गर्भे उत्पन्नो योऽश्वत्थस्तस्तस्माद्उद्भवो यस्यस्ताम् ।

सदस्यैस्तत्सदो व्यक्तं शुशुभे यज्ञकर्मणि ।
जल्पन्ति मधुरा वाचः सानुसाराः क्रियास्तथा ॥ ३-२३-२४

अनुसाराः सहायाश्चमसाध्वर्व्यादयः तत्सहितः ।

कर्मभिश्च तपोयुक्तैर्वेदवेदाङ्गपारगैः ।
सूर्येन्दुसदृशै राजन्विरराज महाक्रतुः ॥ ३-२३-२५

ब्रह्मघोषेण महता ब्रह्मावास इवापरः ।
वसुधामिव संप्राप्तैः सर्वैरेव दिवौकसैः ॥ ३-२३-२६

दिवौकसैः छान्दसमकरान्तत्वम् ।

वेदवेदाङ्गविद्भिश्च विनीतैर्ब्रह्मवादिभिः ।
गतागतैस्तपःश्रान्तैः स्वर्गलोके महीयते ॥ ३-२३-२७

गतैरागतैश्च महीयते क्रतुरित्यपकृष्यते । मनुष्यलोके तु सुतरां महीयत इति भावः ।

ज्वलद्भिरिव विप्रैस्तैस्त्रिभिरेवाध्वरेऽग्निभिः ।
ब्रह्मलोक इवाभाति ब्रह्मणः स महाक्रतुः ॥ ३-२३-२८

त्रिभिरेव ।

इन्द्रप्रोक्तानि सामानि गायन्ति ब्रह्मवादिनः ।
वचनानि प्रयुक्तानि यजूंषि विततेऽध्वरे ॥ ३-२३-२९

सामानि स्तोत्राणी वचनानि शास्त्राणि ।

तपःशान्ता ब्रह्मपराः सत्यव्रतसमाहिताः ।
आययुर्मुनयः सर्वे मनोभिः श्रोत्रवादिभिः ॥ ३-२३-३०

श्रोत्रवादिभिः श्रुतमात्रानुसारिभिर्मनोभिः संकल्पैः ।

होता चैवाभवद्राजन्ब्रह्मत्वे च बृहस्पतिः ।
सर्वधर्मविदां श्रेष्ठः पुराणो ब्रह्मसंभवः ॥ ३-२३-३१

होता ब्रह्मा च बृहस्पतिरेव मूर्तिभेदं प्रकल्प्याभूदित्यर्थः ।

यजमानश्च यज्ञान्ते विष्णोः पूजां प्रयुज्य च ।
आदित्याः पश्चिमे गर्भे तपसा सम्वृते नृप ॥ ३-२३-३२

विष्णोः पूजां विष्ण्वर्चनं प्रपूज्य कृत्वा क्रतुमहिन्मा यजमानोऽदित्या गर्भे जात इति शेषः । क्रतुर्भिर्देवत्वं प्राप्यमित्यर्थः ।

पदं विष्णुरजो ब्रह्मा निर्द्वन्द्वं निष्परिग्रहम् ।
यतः पदसहस्राणि भविष्यन्त्युद्भवन्ति च ॥ ३-२३-३३

एवं कर्मफलं देवताभवं सुखबहुलमुक्त्वा सुखदुःखस्पर्शशून्यं - *ते ह वै शरीरस्य सतः प्रियाप्रिययोरपहतिरस्य शरीरं वा- व सन्तं प्रियाप्रिये स्पृशतः* - इति श्रुतिप्रसिद्धं शरीरतालक्षणं मोक्षं विष्णुपदमाह - पदमिति । पदं विष्णुरिति सामानाधिकरण्येन - *तद्विष्णोः परं पदम्* इति षष्टी राहोः शिरमितिवदौपचारिकभेदपरेति दर्शितम् । अजो न जायते ब्रह्मादिवदित्यजः कर्मप्राप्यः ब्रह्मा ब्रह्मवित् विष्ण्वाख्यं निर्द्वन्द्वं कर्मप्रायं पदमेतीत्यर्थः । निष्परिग्रहं निर्गतज्ञानतत्कार्ये पदमेव स्तौति - यत इति

। इन्द्रादिपदसहस्राणीत्यर्थः

**अवन्ध्यं चाप्रमेयं च व्यतिरिक्तं च कर्मभिः ।**
**आत्मापि यस्य मुनयो भवन्ति निष्परिग्रहाः ॥ ३-२३-३४**

अवन्ध्यम् सर्वकर्मफलगर्भितम् । अवध्यमिति पाठे त्वविनाशी इतरत्र तु विनाशीत्यर्थः । अज इत्यस्य व्याख्यानं - व्यतिरिक्तमिति । आत्मा अपि आत्मैव यस्य मुनयो भवन्तीति पदं विष्णोरभेदो व्याख्यातः ।

**परिग्रहाश्च विषया दोषप्राप्ता महीपते ।**
**दोषाश्च युगपत्सर्वे छादयन्ति मनोबलात् ॥ ३-२३-३५**

**परिग्रहाः परीतो गृह्णन्ति बध्नन्तीति परिग्रहा विषया रूपादयः दोषप्राप्ता रागादिदोषेणैव कल्पिताः । तथा चाक्षपादाचार्यप्रणीतं न्यायोपबृंहितं सूत्रं** - *दोषनिमित्तं रूपादयो विषयाः संकल्पकृताः* इति । बलात् पूर्वसंस्कारबलात् मनश्चादयन्ति । अतो अत्यन्तावहितेन दोषा निग्राह्या इति भावः ।

**इन्द्रियग्रामविषये चरन्तो निष्परिग्रहाः ।**
**परिग्रहं शुभं धर्ममविद्यालक्षणं विदुः ॥ ३-२३-३६**

ननु रूपादिदर्शनं देहवतामपरिहार्यं तत्कथं निष्परिग्रहत्वं सेत्स्यतीत्याशङ्क्य अहं-ममेत्यविद्यैव परिग्रहो न दर्शनमत्रमित्याह - इन्द्रियेति । चर्नतोऽपि निष्परिग्रहा एव भवन्ति मुनय इति शेषः । ऐन्द्रजालिक्यां संपदि तत्त्वविदिव न सज्जत इति भावः ॥ शुभं वेदबोधितं धर्ममपि अविद्यालक्षणं परिग्रहं बन्धकमेव विदुरतो निर्द्वन्द्वमेव विष्णुपदं श्रेय इति भावः ।

**विद्यालक्षणसंयोगान्न मनश्छादयते नृप ।**
**यदि चेन्मुनिशब्देन गृह्यते ब्रह्मवादिभिः ॥ ३-२३-३७**

विद्येति । रागादिभिरिति शेषः । कदा न च्छाद्यत इत्यत आह यदिति । ब्रह्मवादिभिर्यदि यदा मुनिशब्देन मुनित्वप्रतिपादकशब्देन तत्त्वमसिवाक्योपदेशेन प्रणवोपदेशेन वा गृह्यतेऽनुगृह्यते तदा तदर्थमननाज्ज्ञाततत्त्वो न रागादिभिश्छाद्यत इत्यर्थः ।

**वेदविद्याव्रतस्नातैर्नियतैः कुरुसत्तम ।**
**दिवि लोकाः सतां स्थानं लोकानां लोक उच्यते ॥ ३-२३-३८**

प्रासंगिकं विद्याफलादिकं समाप्य प्रकृतं कर्मफलमनुसरति - वेदेति । सतां लोकानां जनानां स्थानं यद्दिवि तदेव कर्मठवृद्धैर्लोक इत्युच्यत इत्यर्थः ॥

**यत्र देवा हव्यपुष्टा न क्षयं यान्ति भारत ।**
**यजमानश्च भोगैः स्वैः कर्मप्राप्तोदिते पदे ।**
**मोदते सह पत्नीभिर्विज्वरो वसुधाधिप ॥ ३-२३-३९**

स्थानमेव विशिनष्टि यत्रेत्यर्धेन । कर्मप्राप्तोदिते कर्मभिः प्राप्ते अधिकारिभिश्च भुङ्क्तैतत्पदमित्युदिते मोदते ॥

**यज्ञावसाने शैलेन्द्रं द्विजेभ्यः प्रददौ प्रभुः ।**
**दयया सर्वभूतानां निर्मलेनान्तरात्मना ॥ ३-२३-४०**

यज्ञेति ।- *शैलं दिव्यं देहं पित्र्यं वा गान्धर्वं वा दैवं वा प्रजापत्यं वा ब्राह्मं च* - इति श्रुतिप्रसिद्धं कर्मफलभूतं द्विजं द्विजेभ्यः त्रैवर्णिकेभ्यो यजमानेभ्यः प्रभुर्यज्ञफलदाता महाविष्णुः देवानां भूतपालकत्वाद्दययेति ॥

**तं शैलं सर्वगात्राणि परस्परविशेषिणः ।**
**न शेकुः प्रविभागार्थं भेत्तुं सर्वोद्यमैरपि ॥ ३-३२-४१**

तं शैलमिति ।शैलं सर्वगात्राणीति सामानाधिकरण्यं वेदाः प्रमाणमितिवत् ।सर्वगात्रात्मकक्षेत्ररूपं शैलं परस्परविशेषिणो भेददृष्टया मिथो ब्राह्मणत्वक्षत्रियत्वादि-जात्यभिमानेन विशेषवन्तः भेत्तुं आत्मनो व्यतिरेकेण निश्चेतुं न शेकुः ।सर्वोदयमैः कृत्स्नैरपि कर्मभिः किमर्थं भेदनं प्रविभागार्थं प्रकर्षेण विद्यादिभ्य आत्यन्तिकव्यतिरेकस्तदर्थं मोक्षार्थमित्यर्थः । क्रतुकोटयाऽपि मोक्षं न लभ्यत इत्याशयः ।

**ततस्ते ब्राह्मणगणा निषेदुर्वसुधातले ।**
**श्रमेणाभिहताः सर्वे विवर्णवदना नृप ॥ ३-२३-४२**

तत इति । देवताभावेऽप्युच्चनीचभावदर्शनक्षोभेण श्रान्तास्ते निषेदुः वसुधातले पुनः संसारं प्रापुरित्यर्थः । विवर्णवदनाः स्वर्गे भृशं दुःखेन ।

**सुपार्श्वो गिरिमुख्यस्तु वाग्भिर्मधुरभाषिता ।**
**अब्रवीत्प्रणतः सर्वाञ्छिरसा तान्द्विजोत्तमान् ॥ ३-२३-४३**

सुपार्श्व इति ।शोभनं पार्श्वोपलक्षितं सामीप्यं यस्य स सुपार्श्वः सद्गुरुः गिरिमुख्यः *गिरति ह वै द्विषन्तं पाप्मानम्*इति श्रौतनिर्वचनात् पापच्छेत्तॄणां मुख्यः समूलाविद्योच्छेदकत्वात् । प्रणतः शान्तः तान्प्रति शिरसा वेदान्तवाक्येन *ओमापोज्योतिरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्* - इति ।अनेन वायव्यादीनां ब्रह्मभावप्रतिपादकेन अब्रवीत् ।

**न हि शक्यो बलाद्भेत्तुं युष्माभिरसुसङ्गिभिः ।**
**अपि वर्षशतैर्दिव्यैः परस्परविरोधिभिः ॥ ३-२३-४४**

न हीति ।अयं देहाभिमानशैलः बलात् हठेन युक्त्याः विना भेत्तुं न हि शक्यः ।तत्र हेतुः असुसङ्गिभिः असुषु इन्द्रियेषु सङ्गशीलैः देहेन्द्रियादिष्वात्मधीमद्भिः

**एकीभूता यदा सर्वे भविष्यथ समाहिताः ।**

**अविरोधेन युगपद्विभजिष्यथ निर्वृताः ॥ ३-२३-४५**

भेदने उपायमाह- एकीभुताः समाहिताः समाधिमन्तौ यदि समाधौ एकात्म्यं प्राप्ताः । *अत्र ह्येते सर्व एकं भवति* इति श्रुतिप्रसिद्धं हि तत् अविरोधेन सर्वभुताभयदानेन निर्वृताः शान्ताः यदि भविष्यथ तर्ह्येवैनम् विभजिष्यथ । समाधिरेव देहाहंधीभेदक इत्यर्थः ।

**बलं हि रागद्वेषाभ्यां वर्धते ब्रह्मसत्तमाः ।**
**विमुक्तं रागदोषाभ्यां ब्रह्म वर्धति शाश्वतम् ॥ ३-२३-४६**

बलमिति । बलं स्वभावजयसामर्थ्यं रागस्तत्सहचरो द्वेषः ताभ्यां वर्धते च्छिदयते चौराधिकस्य वृद्धेर्ह्यकिंचिद्भूय ब्रह्म ब्रह्मनिष्ठा वर्धति वर्धते । आर्षस्तञ्भावः ॥

**यदाऽहं भेदयिष्यामि स्वर्गभिन्नैः शिलाशतैः ।**
**धातुभिश्च विसर्पद्भिः शिखरैश्चानुपातिभिः ॥ ३-२३-४७**

यदाहमिति । अहं गुहाशयैश्चोदयमानः एनं शैलं भेदयिष्यामि युष्मान् भेदने नियोक्ष्यामि । तदैव भेत्स्यथेति अध्याहृत्य श्लोकद्वयं योज्यम् । अहं गुरुः गुहायां बुद्धौ शेरते ते संस्कारास्तैः स्वर्गाभिन्नैः स्वर्गात् पृथग्भुतैः ऐहिकामुष्मिकभोगविरक्तैः अत एव शिलाशितैः स्फटिकशिलावदत्यच्छैर्धातवो देहारम्भकाणि तेजोऽबन्नानि तैस्तत्कार्याणि वाक्प्राणमनांसि । *अन्नमयं हि सौम्य मनः आपोमयः प्राणस्तेजोमयी वाक्* - इति श्रुतेः । तेषां वागाधीनां विसर्पणेन प्रवृत्तिलिङ्गेनेत्यर्थः । शिखरैरिवोच्छ्रितैरिन्द्रियैरनुपातिभिः खले-कपोतन्यायेन तत्त्वेन पतनशीलैः ।

**विशीर्णैः पार्श्वविवरैर्नागैश्च गलितैर्भुवि ।**
**बहुभिर्व्यालरूपैश्च चोदयमानो गुहाशयैः ॥ ३-२३-४८**

पार्श्वशब्देन समीपस्थाख्यादयस्तान्येव विवराणि चित्ताहिप्रवेशबिलानि तैर्विशीर्णैः तथा नागैः श्वेतसर्पतुल्यैः शास्त्रादिव्यसनैः व्यालैः कृष्णसर्पतुल्यैः कामादिव्यसनैश्च विशीर्णैश्चोदयमानः प्रेर्यमाणः एतैर्गुणैः प्रीतो गुरुर्यदा देहाद्यध्यासमपनिनीषेत्तदैव तन्नाशो नान्यथेत्यर्थः

प्रतिगृह्य च तद्वाक्यं शैलेन्द्रस्य सुभाषितम् ।
तूष्णीं बभूवुस्ते सर्वे तदा ब्राह्मणसत्तमाः ॥ ३-२३-४९

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि पौष्करे त्रयोविंशोऽध्यायः

तूष्णीं बभूवुः वैराग्याद्यभावादात्मनः देहात्पृथक्करणव्यापारान्निवृत्ता इत्यर्थः ।

इति श्रीमहाभारते हरिवंशे भविष्यपर्वणि टीकायां त्रयोविंशतितमोऽध्ययः

Harivamsha Maha Puranam - Part 3 - Bhavishya Parva
iitranslated by G. Scaufelberger, scaufel@wanadoo.fr August 22, 2008
Proof-read by K S Ramacandran, ramacandran_ksr@yahoo.ca
Electronic version of Nilakantha commentary by A. Purushothaman, purushu55@gmail.com

Devanagari version prepared using latex-sanskrit package of Charles Wikner

If you find any errors compared to Chitrashala Press edition, send corrections to A. Harindranath, harindranath_a@yahoo.com